# Shri Shivakamasundari Pancharatnam

# શ્રીશિવકામસુન્દરીપઞ્ચરત્નમ્

## Document Information

Text title : Shivakamasundari Pancharatna Stotram

File name : shivakAmasundarIpancharatnam.itx

Category : devii, pancharatna, devI, pArvatI

Location : doc_devii

Author : Copyright : Raghava Deekshithar N sivathmika.puliyur at gmail.com

Transliterated by : Raghava Deekshithar N

Proofread by : Raghava Deekshithar N

Latest update : August 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 2, 2025

*sanskritdocuments.org*

# શ્રીશિવકામસુન્દરીપઞ્ચરત્નમ્

રાકાચન્દ્ર સુદીપ્ત વક્ત્રકમલામાલોલનીલાલકાં
ગૌરીં કુઙ્કુમભૂષિતાઙ્ગલતિકાં માઙ્ગલ્યસૂત્રોજ્વલામ્ ।
શ્રીમચ્છૈવસુજાહ્નવી તટગૃહાં ભક્તેષ્ટસમ્પત્પ્રદાં
વન્દે ત્વાં શિવકામસુન્દરસખીં વાઞ્છાધિકેષ્ટપ્રદામ્ ॥ ૧॥

કાન્ત્યા વિશ્વવિમોહિનીં કલિમલપ્રદ્ધ્વંસિનીં હર્ષિણીં
શાર્દૂલાઙ્ઘ્રિપતઞ્જલિ પ્રભૃતિભિર્ભક્તૈર્નુતાઙ્ઘ્રિદ્વયામ્ ।
પાપાઘૌઘવિનાશનૈક ચતુરામાકર્ણનેત્રોત્પલાં
વન્દે ત્વાં શિવકામસુન્દરસખીં વાઞ્છાધિકેષ્ટપ્રદામ્ ॥ ૨॥

નિત્યાં નીરજલોચનાં નિગમગાં નિત્યાદિભિશ્શંસિતાં
શોકધ્વાન્ત રવિપ્રભાં શ્રિતજનાભીષ્ટપ્રદાં સત્વરમ્ ।
મુક્તાહારવિભૂષિતાર્મુનિજનૈર્મુક્ત્યર્થમાસેવિતાં
વન્દે ત્વાં શિવકામસુન્દરસખીં વાઞ્છાધિકેષ્ટપ્રદામ્ ॥ ૩॥

નન્દિસ્કન્દગજેન્દ્રચણ્ડ ગણપૈસ્સેવ્યાં પરાં દેવતાં
વેદૈઃપ્રસ્તુત વૈભવાં વિધિમુખૈર્વૃન્દારકૈર્વન્દિતામ્ ।
શ્રીમત્સ્વર્ણસભાધિનાથ દયિતાં કારુણ્યકલ્લોલિનીં
વન્દે ત્વાં શિવકામસુન્દરસખીં વાઞ્છાધિકેષ્ટપ્રદામ્ ॥ ૪॥

શ્રીમત્તિલ્લવનૈકવાસિમખિભિસ્સમ્પૂજ્યમાનાં મુદા
શ્રીકલ્યાણગુણાવહાં ગિરિસુતાં પુત્રાદિ સમ્પત્પ્રદામ્ ।
શાન્તાં શામ્ભવતલ્લજૈઃપરિવૃતાં સંસારતાપાપહાં
વન્દે ત્વાં શિવકામસુન્દરસખીં વાઞ્છાધિકેષ્ટપ્રદામ્ ॥ ૫॥

ઇતિ શ્રીશિવકામસુન્દરીપઞ્ચરત્નં સમ્પૂર્ણમ્ ।

Composed, encoded, and proofread by
(Copyright) Raghava Deekshithar N sivathmika.puliyur at gmail.com

*Shri Shivakamasundari Pancharatnam*

pdf was typeset on August 2, 2025

Please send corrections to *sanskrit@cheerful.com*